# B.A. (Part—I) Semester—I Examination
## SANSKRIT
## Compulsory Paper—1
## (Other Language)

समय: — होरात्रयम्] [पूर्णाङ्का: — 80

**सूचना :—** विशेष निर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत।

1. अनुवादं कुरुत :— 5

राजा — (उपगम्य, सस्मितम्) अयि मो ! महर्षिपुत्र।

तापसी — भद्रमुख, न खल्वयं ऋषिकुमार:।

राजा — आकारदृशं चेष्टितमेवास्य कथयति। स्थानप्रत्ययात्तु वयमेवंतर्किण:।

तापसी — (उभौ निर्वर्ण्य) आश्चर्यमाश्चर्यम्।

राजा — आर्ये किमिव ?

तापसी — अस्य बालकस्य तेऽपि संवादिन्याकृतिरीते विस्मितास्मि।

**अथवा**

लव: — आर्य, क एष चन्द्रकेतुनमि।

जनक: — जानासि रामलक्ष्मणौ दाशरथी ?

लव: — एतावेव रामायणकथापुरुषौ।

जनक: — अथ किम्।

लव: — तत्कथं न जानामि।

जनक: — तस्य लक्ष्मणस्य अयमात्मजश्चन्द्रकेतु:।

लव: — उर्मिलाया: पुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्र:।

2. अनुवादं कुरुत :— 5

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यश: सुखकरी विद्या गुरुणां गुरु:।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता नतु धनं विद्याविहीन: पशु:।।

**अथवा**

भूषणैर्वसनैः पात्रैः पुत्राणामुपलालनैः।
सकृदागत्य गच्छन्ती कन्या निर्मार्ष्टि मन्दिरम्।।
गृहिणी स्वजनं वक्ति शुष्काहारं मिताशनम्
पतिपक्ष्यांस्तु बह्वाशान् क्षीरपांस्तस्करानपि।।

3. ससन्दर्भ स्पष्टीकरणं लिखत :— 10

(अ) स्वाध्यायान्मा प्रमदः

**अथवा**

अनार्यपरदारव्यवहारः।

(ब) शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत्।

**अथवा**

सर्वे गुणाः काञ्चनमाश्रयन्ते।

4. इन्द्रियकथां स्वशब्दैः लिखत। 10

**अथवा**

चोरविप्रेण किरातेभ्यः चतुर्णां ब्राह्मणानां रक्षण कथं कृतम् इति सविस्तरं लिखत।

5. कौत्सेन गुरुदक्षिणार्थं घनं कथं प्राप्तम् इति सविस्तरं लिखत। 10

**अथवा**

रामभरतयोः संवादः इति पाठस्य सारांशं लिखत।

6. निम्नलिखित गद्य-परिच्छेदं पठित्वा उत्तराणि **संस्कृतभाषया** लिखत :— 5

ततः सः धूर्तविप्रस्तान् गन्तुमुद्यतान् प्रेक्ष्य चिन्ताव्याकुलमनाः सञ्जातः। अहो धनमेतन्न किञ्चिन्मम चटितम्। अथैमिः सह यामि। पथि क्वापि विषं दत्वा एतान्निहत्य सर्वरत्नानि गृह्णामि। इति विचिन्त्य तेषामग्रे सकरूणं विलप्येदमाह। भो मित्राणि, यूयं मामेकाकिनं मुक्त्वा गन्तुमद्यताः।

(i) धूर्तविप्रः केन कारणेन चिन्ताव्याकुलमनाः सञ्जातः ?

(ii) सः किं चिन्तितवान् ?

(iii) सः तान् विप्रान् किं सम्बोधितवान् ?

(iv) एषः परिच्छेदः कस्मात् पाठात् गृहीतः ?

(v) अस्य पाठस्य रचयिता कः ?

7. निम्नलिखितं पद्यपरिच्छेदं पठित्वा उत्तराणि **संस्कृतभाषया** लिखत :— 5

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति।
आपद्गतं न च जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्त:।।

(i) क: पापान्निवारयति ?

(ii) सन्मित्रं किं गूहति ?

(iii) सन्नित्रं किं प्रकटीकरोति ?

(iv) क: काले ददाति ?

(v) सन्मित्रस्य कति लक्षणानि अत्र उक्तानि ?

8. उचितपर्यायेण रिक्तस्थानानि पूरयत :— 5

(i) भगवद्गीता _______ अन्तर्भूता अस्ति। (रामायणे, महाभारते, भागवते)

(ii) बुद्धचरितम् इति महाकाव्यम् _______ विरचितम्। (माघेन, श्रीहर्षेण, अश्वघोषेण)

(iii) महाकविना भासेन _______ रूपकाणि रचितानि। (20, 18, 13)

(iv) महाकविकालिदास्य _______ रचना: प्रसिद्धा:। (अष्ट, सप्त, षोडश)

(v) महाभारतम् इति ग्रन्थस्य मूलनाम _______ इति अस्ति। (जय, विजय, महायुद्धम्)

9. **द्वयो:** स्तम्भयो: मेलनं कुरुत : 5

| **स्तम्भ: 'अ'** | **स्तम्भ: 'ब'** |
|---|---|
| (i) रामभरतयो: संवाद | (अ) छान्दोग्य उपनिषद् |
| (ii) पितृपुत्रमेलनम् | (ब) रघुवंशम् |
| (iii) नीतिविषयकम् | (क) कालिदास: |
| (iv) कौत्सस्य गुर्वर्थप्राप्ति: | (ड) भर्तृहरि: |
| (v) इन्द्रियकथा | (ई) रामायणम् |

10. टिप्पणी: लिखत :— 20

(i) व्यास:

(ii) कालिदास:

(iii) चरक:

(iv) वाग्भट:।